# Chaturvimshatimurttimstotrakathanam

# चतुर्विंशतिमूर्त्तिंस्तोत्रकथनम्

## Document Information

Text title : Chaturvimshatimurttimstotrakathanam

File name : chaturviMshatimUrttiMstotrakathanam.itx

Category : vishhnu, vishnu, krishna, agnipurANa, stotra, viMshati

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : agnipurANa | adhyAya 48/1-15||

Latest update : October 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2024

*sanskritdocuments.org*

# चतुर्विंशतिमूर्त्तिंस्तोत्रकथनम्

भगवानुवाच ।
ॐरूपः केशवः पद्मशङ्खचक्रगदाधरः ।
नारायणः शङ्खपद्मगदाचक्री प्रदक्षिणम् ॥ १॥

ततो गदी माधवोऽरिशङ्खपद्मी नमामि तम् ।
चक्रकौमोदकीपद्मशङ्खी गोविन्द ऊर्जितः ॥ २॥

मोक्षदः श्रीगदी पद्मी शङ्खी विष्णुश्च चक्रधृक् ।
शङ्खचक्राब्जगदिनं मधुसूदनमानमे ॥ ३॥

भक्त्या त्रिविक्रमः पद्मगदी चक्री च शङ्ख्यपि ।
शङ्खचक्रगदापद्मी वामनः पातु मां सदा ॥ ४॥

गतिदः श्रीधरः पद्मी चक्रशार्ङ्गी च शङ्ख्यपि ।
हृषीकेशो गदी चक्री पद्मी शङ्खी च पातु नः ॥ ५॥

वरदः पद्मनाभस्तु शङ्खाब्जारिगदाधरः ।
दामोदरः पद्मशङ्खगदाचक्री नमामि तम् ॥ ६॥

तेने गदी शङ्खचक्री वासुदेवोऽब्जभृज्जगत् ।
सङ्कर्षणो गदी शङ्खी पद्मी चक्री च पातु वः ॥ ७॥

गदी चक्री शङ्खगदी प्रद्युम्नः पद्मभृत्प्रभुः ।
अनिरुद्धश्चक्रगदी शङ्खी पद्मी च पातु नः ॥ ८॥

सुरेशोऽर्यब्जशङ्खाढ्यः श्रीगदी पुरुषोत्तमः ।
अधोक्षजः पद्मगदी शङ्खचक्री च पातु वः ॥ ९॥

देवो नृसिंहश्चक्राब्जगदी शङ्खी नमामि तम् ।
अच्युतः श्रीगदी पद्मी चक्री शङ्खी च पातु वः ॥ १०॥

बालरूपी शङ्खगदी उपेन्द्रश्चक्रपद्म्यपि ।

जनार्द्दनः पद्मचक्री शाङ्गधारी गदाधरः ॥ ११॥

शार्ङ्गी पद्मी च चक्री च हरिः कौमोदकीधरः ।
कृष्णः शार्ङ्गी गदी पद्मी चक्री मे भुक्तिमुक्तिदः ॥ १२॥

आदिमूर्तिर्वासुदेवस्तस्मात्सङ्कर्षणोऽभवत् ।
सङ्कर्षणाच्च प्रद्युम्नः प्रद्युम्नादनिरुद्धकः ॥ १३॥

केशवादिप्रभेदेन एकैकस्य त्रिधा क्रमात् ।
द्वादशाक्षरकं स्तोत्रं चतुर्विंशातिमूर्त्तिमत् ॥ १४॥

यः पठेच्छृणुयाद्वापि निर्मलः सर्वमाप्नुयात् ॥ १५॥

इत्यादिमहापुराणे आग्नेये चतुर्विंशतिमूर्त्तिस्तोत्रम् ।
नाम अष्टाचत्वारिंशोऽध्यायः ॥ ४८॥

अग्निपुराण । अध्याय ४८/१-१५॥

agnipurANa . adhyAya 48/1-15..

Proofread by PSA Easwaran

*Chaturvimshatimurttimstotrakathanam*
pdf was typeset on October 2, 2024

Please send corrections to *sanskrit@cheerful.com*